# शङ्करदिग्विजयम्

## अनुक्रमणिका

१. प्रथमः सर्गः उपोद्घातः
२. द्वितीयः सर्गः आचार्यजन्मादिकथनम्
३. तृतीयः सर्गः देवावतारः
४. चतुर्थः सर्गः कौमारचरितवर्णनम्
५. पञ्चमः सर्गः संन्यासग्रहणम्
६. षषठः सर्गः आत्मविद्याप्रतिष्ठा
७. सप्तमः सर्गः व्यासदर्शनादिचरितवर्णनम्
८. अष्टमः सर्गः श्रीमदाचार्य मण्डनमिश्रसंवादः
९. नवमः सर्गः श्रीमदाचार्यसरस्वतीसंवादः
१०. दशमः सर्गः राजदेहप्रवेशादि कथनम्
११. एकादशः सर्गः उग्रभैरववधः
१२. द्वादशः सर्गः हस्तामलकादीनां शिष्यत्वेन ग्रहणम्
१३. त्रयोदशः सर्गः ब्रह्मविद्याविचारः
१४. चतुर्दशः सर्गः पद्मपादतीर्थयात्रावर्णनम्
१५. पञ्चदशः सर्गः आचार्यकृतदिग्विजयवर्णनम्
१६. षोडशः सर्गः श्रीमदाचार्याणां शारदापीठवासवर्णनम्

विधिशतमखचन्द्रोपेन्द्रवाय्वग्निपूर्वाः
सुरनिकरवरेण्याः सर्षिसङ्घाः ससिद्धाः ॥ १०३॥

विद्युदवल्लीनियुतसमुदारब्धयुद्धैर्विमानैः
सङ्ख्यातीतैः सपदि गगनाभोगमाच्छादयन्तः ।
स्तुत्वा देवं त्रिपुरमथनं ते यतीशानवेषं
मन्दारोत्थैः कुसुपनिचयैरब्रुवन्नर्चयन्तः ॥ १०४॥

भवानाद्यो देवः कवलितविषः कामदहनः
पुरारातिर्विश्वप्रभवलयहेतुस्त्रिनयनः ।
यदर्थं गां प्राप्तो भवमथन वृत्तं तदधुना
तदायाहि स्वर्गं सपदि गिरिशास्मत्मियकृते ॥ १०५॥

उन्मीलद्विनयप्रधानसुमनोवाक्यावसाने महा-
देवे सम्भृतसम्भ्रमे निजपदं गन्तुं मनः कुर्वति ।
शैलादिः प्रमथैः परिष्कृतवपुस्तस्थौ पुरस्तत्क्षणा-
दुक्षा शारदवारिदुग्धवरटाहङ्कारहुङ्कारकृत् ॥ १०६॥

इन्द्रोपेन्द्रप्रधानैस्त्रिदशपरिवृढैः स्तूयमानः प्रसुनै-
र्दिव्यैरभ्यर्च्यमानः सरसिरुहभुवा दत्तहस्तावलम्बः ।
आरुह्योक्षाणमग्र्यं प्रकटितसुजटाजूटचन्द्रावतंसः
शृण्वन्नालोकशब्दं समुदितमृषिभिर्धाम नैजं प्रतस्थे ॥ १०७॥

आदितः श्लोकाः १८४३ ।

इति श्रीमाधवीये तच्छारदापीठवासगः ।
सङ्क्षेपशङ्करजये सर्गः पूर्णोऽपि षोडशः ।

इति श्रीमद्विद्यारण्यविरचितः श्रीमच्छङ्करदिग्विजयः समाप्तः ॥

Proofread by Mohan Chettoor

*Shankaradigvijayam*

pdf was typeset on March 24, 2024

